स्यात् पुरुषं हानिं वादेऽथ वा जयमिति" वृह० उक्तेः ९ "श्रौते कर्मणि न० "उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृजेथामयञ्च" यजु० १५,५४ इष्टापूर्त्ते श्रौतस्मार्त्ते कर्मणी" वेददी०। १० इच्छया कल्पिते त्रि० "इष्ट-घ्नतिरिष्टगुणिता व्येका दलिता विभाजितेष्टेन" लीला० ११यज्ञेन तोषिते परात्मनि १२विष्णौ च पु० "इष्टो-विशिष्टः शिष्टेष्टः" विष्णु स० "इष्टः परमानन्दात्मकत्वेन प्रियः यज्ञेन पूजितो वेति" भा०। यज–करणे वा० क्त, भावे क्त अस्त्यर्थे अच् वा। १३ इष्टकायां न०। "मरुताकेण शुध्यन्ति पक्वेष्टरचितानि च" विष्णु०।

**इष्टकचित** त्रि० इष्टकया चितः तृस्वः। इष्टकाभिर्व्याप्ते

**इष्टकर्मन्** न० इष्टप्रसिद्ध्यर्थं कर्म शाक०त०। लीलावत्युक्ते गणितभेदे तत्प्रकारो यथा "अथेष्टकर्मसु करणसूत्रं वृत्तम् 'उद्देशकालापवदिष्टराशिः क्षुण्णो हृतोंऽशैरहितो युतो वा। इष्टाहतं दृष्टमनेन भक्तं राशिर्भवेत् प्रोक्तमितीष्ट कर्म। अत्रोद्देशकः। पञ्चघ्नः स्वत्रिभागोनो दशभक्तः सम-न्वितः। राशित्र्यंशार्द्धपादैः, स्यात् कोराशिर्द्व्यूनसप्ततिः। न्यासः गुणः ५। स्वत्रिभागः १/३। हरः१०। राश्यंशाः १/३ १/२ १/४। दृश्यम्। ६८। अत्र किल कल्पित-राशिः ३। पञ्चघ्नः। १५। स्वत्रिभागोनः। १०। दश-भक्तः। १। कल्पित ३ राशेस्त्र्यंशार्द्धपादैः ३/३ ३/२ ३/४ समन्वितोहरोजातः १७/४। अथ दृष्टम् ६८ इष्टेन ३ गुणितम् २०४। हरेण १७/४ भक्तं जातोराशिः। ४८। एवं सर्वत्रोदाहरणे राशिः केनचि-द्गुणितोभक्तोवा राश्यंशेन रहितोयुतोवा दृष्टस्तत्रेष्टं राशिं प्रकल्प्य तस्मिन्नुद्देशकालापवत्कर्मणि कृते यन्निष्पद्यते तेन भजेद्दृष्टमिष्टगुणं फलं राशिः स्यात्। तत्र दृष्टजात्यु-दाहरणम्। यूथार्द्धं सत्रिभागं वनविवरगतं कुञ्जराणाञ्च दृष्टं षड्भागश्चैव नद्यां पिबति च सलिलं सप्तमांशेन मिश्रः। पद्मिन्या चाष्टमांशः स्वनवमसहितः क्रीड़ते सानुरागोनागेन्द्रोहस्तिनीभिस्त्रिभिरनुगतः का भवेद्यूथ-संख्या। न्यासः

१/२ १/६ १/८ दृश्यम् ४। एषां सवर्णने
१/३ १/७ १/९ द्वाभ्यामपवर्त्तितं २/३।४/२१।
५/३६। पुनरेषां सवर्णितानामैक्यं नवभिरपवर्त्तितं २५१/२५२ इष्टोनं १/२५२ अनेन ४ दृष्टे इष्टगुणिते भक्ते जाता हस्तिसंख्या १००८। अपरोदाहरणम्। अमलकमलराशेस्त्र्यंशपञ्चांशषष्ठैस्त्रिनयनहरिसूर्या येन तु-र्येण चार्या। गुरुपदमथ षड्भिः पूजितं शेषपद्मैः सकलकमलसंख्यां क्षिप्रमाख्याहि तस्य। न्यासः १/३ १/५ १/६ १/४ दृश्यम्। ६। अत्रेष्टं राशिम् १ प्रकल्प्य प्राग्वज्जातोराशिः। १२०। अन्यदुदाहरणम्। हारस्तारस्तरुण्यानिधुवनकलहे मौक्तिकानां विशीर्णोभू-मौ यातस्त्रिभागः शयनतलगतः पञ्चमांशोऽस्य दृष्टः। प्राप्तः षष्ठः सुकेश्या गणक! दशमकः संगृहीतः प्रियेण दृष्टं षट्कञ्च सूत्रे कथय कतिपयैर्मौक्तिकैरेष हारः। न्यासः १/३ १/५ १/६ १/१० दृश्यम्। ६। अत्रेष्टं राशिम् १ प्रकल्प्य प्राग्वज्जातोराशिः ३०। अथ शेषजात्युदाहरणम्। स्वार्द्धं प्रादात्प्रयागे नवलवयुगलं योऽवशेषाच्च काश्यां शेषाङ्घ्रिं शुल्कहेतोः पथि दशमल-वान् षट् च शेषाद्गयायाम्। शिष्टा निष्कत्रिषष्टिर्नि-जगृहमनया तीर्थपान्थः प्रयातस्तस्य द्रव्यप्रमाणं वद यदि भवता शेषजातिः श्रुतास्ति। न्यासः।

१/१ दृश्यम् ६३। अत्र रूपम् १ राशिं प्रकल्प्य
१/२ भागान् शेषान् शेषादपास्य अथवा भागा-
२/९ पवाहविधिना सवर्णिते जातम्। ७/६०
१/४ अनेन १इष्टगुणिते ६३ दृष्टे। भक्ते जातं
६/१० द्रव्यप्रमाणम्। ५४०। इदं विलोमसूत्रे-णापि सिध्यति। अथ विश्लेषजात्युदाहरणम्। "पञ्चां-शोऽलिकुलात्कदम्बमगमत्त्र्यंशः शिलीन्ध्रं तयोर्विश्लेष-स्त्रिगुणोमृगाक्षि! कुटजं दोलायमानोऽपरः। कान्ते! केतकमालतीपरिमलप्राप्तैककालप्रियादूताहूतइतस्ततोभ्रम-ति खे भृङ्गोऽलिसंख्यां वद। न्यासः १/५ १/३ २/५ दृश्यम्।१। जातमलिकुलमानम्।१५। एवम् अन्यत्रापि"।

**इष्टका** स्त्री इष–तकन् टाप् इष्टकेषीकामालानाम्" पा० निर्देशान्नात इत्त्वम्। (इट्) मृदादिनिर्मिते १मृत्खण्डभेदे यज्ञिये अग्निचयनार्थे २मृदादिनिर्मिते द्रव्यभेदे च शत० ब्रा० तु निर्वचनान्तरमुक्तं यथा। "यावद्यावद्वै जुहुयात्ता-वत्तावत् भवतीति तद्यस्मा इष्टेकमभवत्तस्मादिष्टका" ६,१, २,२३। "तं देवा अग्न्योराहुतिभिरभिषज्यन् ते यांयामा-हुतिमजुहवुः सासैनं पक्वेष्टका भूत्वा समपद्यत तद्यदिष्टात् कमभवत्तस्मादिष्टकास्तस्मादग्निना इष्टकाः पचन्त्याहु-तीरेवैनास्तत् कुर्वन्ति" इति च तत्रैव। इष्टकाकरणकाल-प्रकारादि" कात्या० श्रौ० १६,२क० दर्शितं यथा। "उखासम्भरणमष्टम्याम्" १सू०। "उखायाः सम्भरणमुखा सम्भरणम् तदष्टम्यां भवति "अष्टकायामुखां सम्भरतीति